# शिव पंचाक्षर मंत्र

नागेन्द्रहाराय त्रिलोचनाय,
भस्माङ्गरागाय महेश्वराय ॥
नित्याय शुद्धाय दिगम्बराय,
तस्मै नकाराय नमः शिवाय॥1॥

मन्दाकिनीसलिलचन्दनचर्चिताय,
नन्दीश्वरप्रमथनाथमहेश्वराय ॥
मन्दारपुष्पबहुपुष्पसुपूजिताय,
तस्मै मकाराय नमः शिवाय,
शिवाय गौरीवदनाब्जबृंदा,
सूर्याय दक्षाध्वरनाशकाय ॥
श्रीनीलकण्ठाय वृषध्वजाय,
तस्मै शिकाराय नमः शिवाय॥2॥

वशिष्ठकुम्भोद्भवगौतमार्यमूनीन्द्र देवार्चिता शेखराय ॥
चन्द्रार्कवैश्वानरलोचनाय,
तस्मै वकाराय नमः शिवाय,
यज्ञस्वरूपाय जटाधराय,
पिनाकहस्ताय सनातनाय ॥
दिव्याय देवाय दिगम्बराय,
तस्मै यकाराय नमः शिवाय॥3॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसंनिधौ ॥
शिवलोकमावाप्नोति शिवेन सह मोदते॥4॥